# श्री सुरसरस्वती सभा (रि.) शृङ्गेरि

## तृतीया परीक्षा

Aug – 2006(1)

### प्रथमपत्रिका

दिनाङ्कः - ३-९-२००६ | अङ्काः -१००

पूर्वाह्णे - १०-०० तः १-०० पर्यन्तम् | समयः - घण्टात्रयम्

**1 एकवाक्येन संस्कृते उत्तरं लिखत । (अष्टानाम्)** 8

१. गणेशं के कदा नमस्कुर्वन्ति ?

२. विक्रमः योगिनमाह्वातुं कं प्रेषयामास ?

३. शुकशावकयोर्नाम किम् ?

४. एकलव्यः किमर्थं द्रोणस्य समीपमागच्छत् ?

५. कीदृशः पुरुषः न किञ्चित्कर्तुमर्हति ?

६. कुतमुपकारं के न विस्मरन्ति ?

७. कीदृशौ सुतौ वरम् ?

८. पञ्चतन्त्रं केन विरचितम् ?

९. कपोतराजस्य नाम किम् ?

१०. वृक्षस्योपरि का स्थिता ?

**2 वाक्यद्वयेन संस्कृतभाषया उत्तरं लिखत । (पञ्चानामेव)** 10

१. नव गोप्यानि कानि ?

२. कीदृशाय शम्भवे नतिः ?

३. ब्राह्मणपुत्रः दीनारकं दृष्ट्वा किमचिन्तयत् ?

४. मल्लः परिकरें बध्वा राजानं किमुवाच ?

५. व्याधः कथमासीत् ?

६. षड्दोषाः के ?

**3 संस्कृतभाषया उत्तरं लिखत । (त्रयाणाम्)** 9

१. शङ्कराचार्यैः कुत्र कुत्र मठाः स्थापिताः ? कुतः ?



पश्चादनुवर्तते

२. नयशास्त्रकर्तार: के ?

३. हनूमान् क: ? स: समुद्रस्योपरि किं किं चकार ?

४. विष्णुशर्मण: प्रतिज्ञा का ?

**4 मातृभाषयां आङ्ग्लभाषया वा उत्तरं लिखत । (त्रयाणाम्)** 12

१ विक्रमस्यौदार्यं पाठरीत्या विवृणुत ।

२. 'ब्राह्मण: सर्पश्च' अस्य कथां स्ववाक्यै: लिखत ।

३. चित्रग्रीव: क: ? स: स्वाश्रितान् कथं ररक्ष ?

४. 'वागाडम्बरवान् लोके न किञ्चित्कर्तुमर्हति। एतत् वाक्यं सोदाहरणं विवृणुत ।

**5 ससन्दर्भं विवरणं संस्कृताङ्ग्लकर्णाटकभाषासु अन्यतमभाषया लिखत। (चतुर्णाम्)** 12

१. नहि किञ्चित् गुरवे अदेयम् ।

२. राजन्! पूरिता मया समस्या ।

३. अकार्यं कृतवानस्मि ।

४. सर्वथा अविचार्य कर्म न कर्तव्यम् ।

५. अतिथिसत्कार: श्रेयस्कर: ।

**6 द्वयो: अन्वयानुसारम् अर्थं कर्णाटकभाषया आङ्ग्लभाषया वा लिखत ।** 6

१. आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मना ।
आत्मना कृतिना च त्वमात्मन्येव प्रलीयसे ।।

२. वागाडम्बरवान् लोके न किञ्चित्कर्तुमर्हति ।
गर्जद्घना: न वर्षन्ति न गर्जन्ति घनाघना: ।।

३. माविषादं कृथा देवि राघवो रावणं रणे।
हत्वा त्वां नेष्यतीत्येनां आश्वास्य स विनिर्ययौ ।।

**7 श्लोकद्वयं पूरयत ।** 4

१. प्रत्यहं ........................सत्पुरुषैरिति ।।

२. सुखार्थी वा ........................ सुखम् ।।

३. शान्ताकारं........................सर्वलोकैकनाथम् ।।

**8 कर्णाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत।** 5

सा साध्वी पतिमागतं दृष्ट्वा ब्राह्मणं विहाय पतिसेवानिरता, भवत् । पाद्यार्घ्यादिभिः मधुरैः भक्ष्यभोज्यैश्च पतिदेवम् अतोषयत्। कर्मणा मनसा वाचा भर्तुः चित्तानुसारिणी सा पतिं दैवतं मेने। सा साध्वी नित्यं संयतेन्द्रिया देवतातिथिभृत्यानां तथा श्वश्रूश्वशुरयोः शुश्रूषाणपरा आसीत् ।

**9 रिक्तस्थानं पूरयत ।** 4

१. छात्रसमूहे ............... कीर्तिश्च ।

२. राजा बन्धुः ................ ।

३. का वा रेखा ............... ।

४. वाग्देवता ............... दोर्भिः युक्तास्ति ।

**10 समानार्थकपदानि लिखत (त्रयाणामेव)** 3

१. मुखम् २. दुग्धम् ३. भुजगः ४. ख्यातः

**11 विरुद्धार्थकपदानि लिखत (त्रयाणामेव)।** 3

१. असुरः २. आद्यः ३. सृष्टिः ४. दिवा

**12 वाक्यदोषं परिहरत (त्रयाणामेव)।** 3

१. मात्रेण सह अहं शालां गच्छामि ।

२. रामस्य नमः ।

३. भवती पत्रं लिख ।

**13 वाक्ये योजयत (एकस्य)।** 3

१. विना २. स्तोत्रम् ३. निरन्तरम् ४. सम्यक्

**14 एकं क्रियापदं पुरुषत्रये लिखत (एकस्य)।** 3

१. अब्रवीत् २. पठतु

**15 सन्धिं विभज्य नाम लिखत (त्रयाणाम्)।** 4

१. एतांस्तव २. यद्यपि ३. षडेते ४. अथैकस्मिन्



पश्चादनुवर्तते

**16 लोकोक्तिमेकां पूरयित्वा अर्थं विवृणुत ।** 3

१. यादृशं भक्षयेदन्नं .............. ।

२. उद्योगिनं ............. लक्ष्मीः ।

**17 द्वयोः प्रयोगपरिवर्तनं कुरुत ।** 2

१. विष्णुशर्मणा पाठिताः राजपुत्राः ।

२. बालकैः क्रीड्यते ।

३. माता अन्नं पचति ।

**18 व्याकरणविशेषं लिखत । (एकस्य)** 2

१. शारदायै नमः २. कपोतराजः

**19 समूहेतरपदं लिखत ।** 4

| | | | | |
|---|---|---|---|---|
| १. | भासः | व्यासः | कुमारव्यासः | कालिदासः । |
| २. | शनैः | उच्चैः | नरैः | नीचैः । |
| ३. | कृतवान् | गतवान् | भवान् | ध्यातवान् |
| ४. | मुखम् | वदनम् | आननम् | जठरम् । |

*****

# श्री सुरसरस्वती सभा (रि) शृङ्गेरि

## तृतीया परीक्षा

Aug - 2007 (2)

## द्वितीयपत्रिका

दिनाङ्कः - २.१.२००७ | अङ्काः - ५०

पूर्वाह्णे - १.३० तः ३.०० पर्यन्तम् | समयः - सार्धैकहोरा

1. दशभिः वाक्यैः संस्कृतभाषया प्रबन्धमेकं रचयत। 5

१. धेनुः २. गणकयन्त्रम् ३. उद्यानम्

2. संस्कृतभाषया पत्रमेकं लिखत । 5

१. अग्रजस्य विवाहनिमित्तं दिनत्रयं विरामं पृच्छन् पत्रमेकं लिखत।

२. प्रवासार्थं धनप्रेषणाय पितरं प्रति पत्रम् लिखत।

3. कन्नड भाषाया आंग्ल भाषाया वा उत्तरं लिखत। (द्वावेव) 6

१. तुमुन् प्रत्ययः २. विशेषणानि ३. उपसर्गाः

4. वाक्यदोषान् परिहरत। 4

१. गुरुं नमः २. पितुः सह पुत्रः गच्छति।

३. सीता शालां गतवान् ४. तस्य विना तृणमपि न चलति।

5. सर्वपुरुषवचनेषु लिखत। (द्वयोः एव) 6

१. मोदिष्यते २. अगच्छत् ३. क्षिपेत्

6. शब्दमेकं सर्वविभक्तिवचनेषु लिखत। 4

१. पितृ २. राजन् ३. एतद् (पुंसि)

7. प्रयोगं परिवर्तयत। 3

१. महानसे सूदेन अन्नमपच्यत।



पश्चादनुवर्तते

२. रामः कौसल्यां अवन्दत ।

३. बालाः गुरून् प्रणमन्ति।

**8.** वाक्यमेकं आंग्ल भाषाया कन्नड भाषाया वा लिखत। **2**

१. सहसा विदधीत न क्रियाम् २. गतं न चिन्तयेत् प्राज्ञः

**9.** अन्यलिङ्गरूपं लिखत (त्रयाणाम्) **3**

१. भवान् २. गतवती ३. सा ४. स्थूलः

**10.** व्याकरणविशेषं लिखत (एकस्य) **2**

१. रामेण सह २. प्रजाभ्यः स्वस्ति ३. नगरात् बहिः

**11.** कन्नड भाषाया आंग्ल भाषाया वा अनुवादं करुत। **5**

बहुवर्षेभ्यः प्राक् कापि नगरे बभूव कश्चित् पुरुषः। तस्य सकाशे अद्भुतं अंगुलीयकम् आसीत्। अस्य काचित् अपूर्वा शक्तिः आसीत्। तत् पितुः सकाशात् पुत्रं ततः पौत्रं प्रति आगतम्। यदा कस्यचित् एकाधिकाः पुत्राः, तदा पितुः प्रियतमः पुत्रः तं प्राप्नोत्।

**12.** संस्कृत भाषया अनुवादं कुरुत। **5**

ಒಮ್ಮೆ ಸಗರನೆಂಬ ರಾಜನಿದ್ದನು. ಅವನು ಅಶ್ವಮೇಧ ಯಾಗವನ್ನು ಮಾಡಲು ನಿರ್ಧರಿಸಿದನು. ಅದಕ್ಕಾಗಿ ಯಜ್ಞಾಶ್ವವನ್ನು ಬಿಟ್ಟನು. ಇಂದ್ರನು ಅದನ್ನು ಅಪಹರಿಸಿದನು. ಅದನ್ನು ಪಾತಾಳದಲ್ಲಿ ಕಪಿಲ ಮಹರ್ಷಿಯ ಹಿಂದೆ ಇಟ್ಟನು. ಸಗರನ ಮಕ್ಕಳು ಅದನ್ನು ಹುಡುಕುತ್ತಾ ಅಲ್ಲಿಗೆ ಬಂದರು.

Once there was a king by name Sagara. He decided to perform the Ashwamedha sacrifice and he released the sacrificial-horse. Indra kidnapped the horse. God Indra placed that horse with the sage Kapila in Patala. Sagara's sons who were searching for that horse came there.